# വൈഭവം 2021
# ഡയറ്റ് & പൊതുവിദ്യാഭ്യാസവകുപ്പ്, എറണാകുളം

दशमी कक्षा

## संस्कृतम्

पूर्णाङ्काः - 20

**I. कोष्ठकात् समुचितम् उत्तरं निर्धार्य लिखत।** **1x 8 = 8**

1. "परिश्रमो मिताहारो भूगतावश्विनीसुतौ।" इति सुभाषितं कस्मात् ग्रन्थात् उद्धृतं भवति?
   (चाणक्यनीतिः, सुभाषितावलिः, पञ्चतन्त्रम्)

2. व्यायामः कथं करणीयः?
   (शनैः, व्यग्रतया, श्रीघ्रम्)

3. दशपुत्रसमः कः?
   (वापी, द्रुमः, बलीवर्दः)

4. कनकधारास्तवः केन विरचितः?
   (शङ्कराचार्येण, कालिदासेन, स्वामिना)

5. सस्यानि प्रमुखतया कतिविधानि सन्ति?
   (त्रिवधानि, चतुर्विधानि, पञ्चविधानि)

6. तञ्चावूर् देशाधिपः कः?
   (त्यागराजः, शरभोजी, चन्द्रगुप्तः)

7. सर्वविषहारि औषधं किम्?
   (हरिद्रा, तुलसी, द्राक्षा)

8. दीनवत्सला जननी इति कथाभागः महाभारतस्य कस्मिन् पर्वणि अन्तर्भवति?
   (भीष्मपर्वणि, विराटपर्वणि, वनपर्वणि)

9. मञ्जूषातः पदानि स्वीकृत्य पट्टिकां पूरयत- **3**

| विभागः | लक्षणम् | उदाहरणम् |
|---|---|---|
| वृक्षः | ———— | आम्रः |
| ———— | प्रतानैः प्रसारिता | कूश्माण्डः |
| ओषधिः | फलपाकान्ता | ———— |

(फलात्पूर्वम् पुष्पम्
व्रीहिः
वीरुत्)

10. उदाहरणानुसारं वाक्यं परिवर्तयत- **2**

उदा- अहं सुष्ठु पाठम् अपठम्। पूर्णमङ्कं न प्राप्तवान्।

यद्यपि अहं सुष्ठु पाठम् अपठम् तथापि पूर्णमङ्कं न प्राप्तवान्

वृक्षे अनेकानि फलानि सन्ति। कानिचित् उपयोगशून्यानि।

11. उदाहरणानुसारं विग्रहवाक्यं लिखत **1**

उदाः- सुराधिपः - सुराणाम् अधिपः।

देवाधिपः - ____________

12. यथोचितं योजयत- **4**

प्रस्थानत्रयम् - शत्रन्तम्

चरकसंहिता - वनस्पतिः

पनसः - ब्रह्मसूत्रम्

पचन् - चरकः

13. अधोदत्तं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत- **4**

इति दीनमुदीरयन्त्यसौ

प्रददावामलकं व्रतीन्दवे।

करुणं वचनं निशम्य सौ*f*-

त्यभवज्जज्ञाननिधिर्दयार्द्रधीः।।

1. कः दर्यार्द्रधीः अभवत्?
2. का आमलकं प्रददौ?
3. श्लोकात् ल्यबन्तमव्ययं चित्वा लिखत।
4. प्रददावामलकम् - पदच्छेदं लिखत।

14. शत्रन्तं ज्ञानजन्तं च विविच्य पट्टिकां रचयत। **3**

नुद्यमानः, पचन्, पचमानः, गच्छन्, कम्पमानः, ताडयन्

15. कनकधारा इति पाठभागमाधारीकृत्य शङ्कराचार्यमधिकृत्य टिप्पणिं लिखत- **3**

सूचनाः- केरलीयः - शिवगुरुः - कनकधारास्तवं- शङ्करदिग्विजयम्।

16. अधोदत्तवाक्यात् कत्वान्तल्यबन्त- तुमुन्तानि अव्ययानि चित्वा लिखत **3**

नाचिकेतसं सत्कर्तुम् असमर्थः यमः तमुपगम्य वरत्रयं दत्त्वा तेन सह संवादमकरोत्।

17. सूचनानुसारं गद्यक्रमं लिखत। **2**

विधिना खलु वञ्चिता वयम्

वितरीतुम् वटवे न शक्नुमः।

अपि भैक्ष्यमकिञ्चनत्वतो

धिगिदं जन्म निरर्थकं गतम्।।

वयम् ——— वञ्चिताः खलु। अकिञ्चनत्वतः ——— भैक्ष्यम् वितरीतुं न शक्नुमः।

इदं जन्म ——— गतम्, ———।

18. अधोदत्तं सुभाषितं जीवने कथम् उपकरोति इति सूचनाः उपयुज्य टिप्पणिं लिखत। **4**

ईर्ष्याभयक्रोधसमन्वितेन

लुब्धेन रुग्दैन्यनिपीडितेन।

विद्वेषयुक्तेन च सेव्यमानम्

अन्नं न सम्यक् परिपाकमेति।।

सूचनाः- आरोग्यशीलम् - चरकसंहिता

- सम्यक् दग्धम् - स्वस्थं भवेत्।

19. प्रादेशिकभाषया अनुवदत- **3**

वेदैः इतिहासपुराणादिभिः काव्यनाटकादिभिः च सुस्मपुष्टा भवति संस्कृतभाषा। संस्कृतभाषायां रचिताः अनेके ग्रन्थाः विश्वप्रसिद्धाः। आधुनिककाले अपि संस्कृतभाषायां रचितानि अनेकानि व्यवहाररूपाणि पश्यामः।

# उत्तरसूचिका।

1. सुभाषितावलिः।
2. शनैः।
3. द्रुमः।
4. शङ्कराचार्येण।
5. चतुर्विधानि।
6. शरभोजी।
7. तुलसी।
8. वनपर्वणि।
9. 1. फलात्पूर्वम् पुष्पम्।
   2. वीरुत्।
   3. व्रीहिः।
10. यद्यपि वृक्षे अनेकानि फलानि सन्ति तथापि कानिचित् उपयोगशून्यानि।
11. देवानाम् अधिपः।
12. 1. ब्रह्मसूत्रम्
    2. चरकः
    3. वनस्पतिः
    4. शत्रन्तम्
13. 1. शङ्करः।
    2. गृहिणी
    3. निशम्य
    4. प्रददौ + आमलकम्
14. शत्रन्तम् - पचन्, गच्छन्, ताडयन्
    ज्ञानजन्तम् - नुद्यमानः, पचमानः, कम्पमानः
15. उचितस्य आशयस्य कृते त्रयः अङ्काः।
16. कत्वान्तम् - दत्त्वा
    तुमुभन्तम् - सत्कर्तुम्
    ल्यबन्तम् - उपगम्य
17. विधिना, वटवे, निरर्थकं, धिक्।
18. उचितस्य आशयस्य कृते पुर्णाङ्काः।
19. सामान्यज्ञानयुक्तानुवादाय त्रयः अङ्काः।